This Question Paper consists of 35 questions and 4 Printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

**Sl. No.**

**Roll No.** **अनुक्रमाङ्कः** | | | | | | | | | | | | |

**Code No.** **गूढसंख्या** **63/S/A**

# VEDA ADHYAYAN
# वेदाध्ययनम्
# (245)

**Set /सेट A**

**Day and Date of Examination**
**(परीक्षादिवसः दिनाङ्कश्च)** ____________________

**Signature of Invigilators** 1. ____________________
**(निरीक्षकयोः हस्ताक्षरम्)** 2. ____________________

**सामान्य निर्देशा :**

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।
3. वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग) वा (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या ।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।

# VEDA ADHYAYAN
# वेदाध्ययनम्
# (245)

Time : 3 Hours] [Maximum Marks : 100

**परीक्षासमयावधि** : 3 **होरात्रयम्**] [**पूर्णाङ्का** : 100

**निर्देशाः** (1) अस्मिन् प्रश्नपत्रे **[A]** भागे **10, [B]** भागे **10, [C]** भागे **10, [D]** भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

(2) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (प्रश्नाः × अङ्काः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

(3) **सर्वे** प्रश्नाः **अनिवार्याः** ।

**[A] दशानां युक्तं विकल्पं चिनुत ।** **[10 × 1 = 10]**

**1.** वेदा अपौरुषेया इति कस्य मतम् –

(क) वेदान्तिनः (ख) नैयायिकस्य

(ग) चार्वाकस्य (घ) बौद्धस्य

**2.** वैदिकच्छन्दांसि कति –

(क) अष्टौ (ख) दश

(ग) सप्त (घ) असंख्येयानि

**3.** शुनःशेपोपाख्याने हरिश्चन्द्रः कम् उपास्य पुत्रं लब्धवान् –

(क) इन्द्रम् (ख) अग्निम्

(ग) वरुणम् (घ) अश्विनौ

**4.** होमजातीययागानां प्रकृतिः का –

(क) दर्शपूर्णमासः (ख) पवमानेष्टिः

(ग) अग्निहोत्रम् (घ) गवामयनः

**5.** भद्रा अश्वा हरितः – अत्र भद्रापदस्य कः अर्थः ?

(क) शान्ताः (ख) कल्याणाः

(ग) धनप्रदाः (घ) विचित्राः

**6.** मिनीमसि द्यविद्यवि – इत्यत्र मिनीमसिपदस्य कः अर्थः ?

(क) हिंसितवन्तः (ख) अवमानितवन्तः

(ग) मननं कृतवन्तः (घ) मनसा नीतवन्तः

7. राजर्षिः हरिश्चन्द्रः कस्मिन् वंशे समुत्पन्नः –

(क) चन्द्रवंशे (ख) इक्ष्वाकुवंशे

(ग) यादववंशे (घ) गौतमवंशे

8. विश्वामित्रेण पुत्ररूपेण गृहीतस्य शुनः शेपस्य किं नाम अभवत्?

(क) देवरातः (ख) आङ्गिरसः

(ग) विश्वश्रवाः (घ) सोयवसिः

9. सूपसदनः – इत्यत्र कः प्रत्ययः –

(क) ल्युट् (ख) युच्

(ग) अनट् (घ) ल्यु

10. नक्षत्रियः – इत्यत्र कः प्रत्ययः?

(क) छ (ख) ठक्

(ग) ढक् (घ) घ

**[B] दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत ।** **[10 × 2 = 20]**

11. ऋगवेदस्य अथर्ववेदस्य च ब्राह्मणानां नाम लिखत । [1+1]

12. को मन्त्रकण्टक इत्युच्यते? [2]

13. हरिश्चन्द्रस्य पुत्रस्य नाम किम्? कः शुनः शेपं पोष्यपुत्ररूपेण स्वीचकार? [1+1]

14. मैक्समूलरस्य मते ऋग्वेदस्य रचनाकालः कः? ऋग्वेदस्य कालविषये शङ्करबालकृष्णदीक्षितस्य च किं मतम्? [1+1]

15. सूर्यसूक्तस्य कः ऋषिः, किं छन्दः, का च देवता? [2]

16. छन्दसि परेऽपि इति सूत्रस्यार्थं सोदाहरणं लिखत । [2]

17. दित्यवाट् – इत्यत्र कः प्रत्ययः? किं चात्र विधायकं सूत्रम्? [1+1]

18. पश्चथम् इत्यत्र कः प्रत्ययः? किं चात्र प्रत्ययविधायकं सूत्रम्? [1+1]

19. अमुप्रत्ययविधायकं सूत्रम् किम्? सूत्रस्यास्य उदाहरणमेकं लिखत । [1+1]

20. शेश्छन्दसि बहुलम् इति सूत्रस्य उदाहरणं लिखत । सूत्रेणानेन किं विधीयते । [1+1]

[C] **दश अनतिदीर्घोत्तरैः समाधत्त ।** [10 × 4 = 40]

21. वशिष्ठविश्वामित्रयोः आख्यानं संक्षेपेण लिखत ।

22. वेदस्य कालविषये मैक्समूलर–महाभागानां मतम् आलोचयत ।

23. वेदे देवतानाम् आकारचिन्तनं कथं विहितमिति प्रतिपादयत ।

24. चित्रं देवानामुदगादनीकम् इति मन्त्रं सम्पूर्णं लिखित्वा तस्यार्थं लिखत ।

25. नानाश्रान्ताय श्रीरस्तीति रोहित शुश्रुम । पापो नृषद्वरो जन इन्द्र इच्चरतः सखा चरैवेति – इति मन्त्रं सप्रसङ्गं व्याख्यात ।

26. ओ षु स्वसारः कारवे श्रृणोत ययौ वो दूरादनसा रथेन । नि षू नमध्वं भवता सुपारा अधोअक्षाः सिन्धवः स्रोत्याभिः ।।
– मन्त्रस्यास्य प्रसङ्गमुल्लिख्य अर्थं विवृणुत ।

27. हव्यवाहनः इति रूपं साधयत ।

28. सोम्यः इति रूपं साधयत ।

29. चतुर्थ्यर्थे बहुलं छन्दसि इति सूत्रं व्याख्यात ।

30. आङ्याजयारामुपसंख्यानम् इति वार्त्तिकं सोदाहरणं व्याख्यात ।

[D] **पञ्च दीर्घोत्तरैः समाधेयाः ।** [5 × 6 = 30]

31. भारतीयसंस्कृतौ वैदिकवाङ्मयस्य प्रभावम् आलोचयत ।

32. वरुणदेवतास्वरूपम् आलोचयत ।

33. संज्ञानसूक्तस्य सारं प्रतिपाद्य आधुनिकसमाजे सूक्तोक्तस्य आदर्शस्य उपकारितां वर्णयत ।

34. सुपां सुलुक् इति सूत्रं सम्पूर्णं लिखित्वा सोदाहरणं व्याख्यात ।

35. तुमर्थे सेसेनसे...... इति सूत्रं सम्पूर्णं लिखित्वा सोदाहरणं व्याख्यात ।

⌘⌘⌘